# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| | | |
|---|---|---|
| कक्षा -आचार्यप्रथमवर्षम् (सत्रम्-१) | प्रश्नपत्रम् – ४ | गुणाः - ७० |
| विषयः - फलितज्यौतिषम् | (C C.- ४.१.३. New & Old ) | समयः -८.०० तः ११.०० |
| दिनाङ्कः - १२/१०/२०१९ | सन्दर्भग्रन्थः - जातकपरिजातः । | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितयोः कस्यचित् एकस्य उपरि सान्वयं व्याख्यां करोतु । ०५**

(अ) मेषाजविश्वक्रियतुम्बुराद्या वृषोक्षगोताबुरूगोकुलानि ।
द्वन्दं नृयुग्मं जुतुमं यमं च युगं तृतीयं मिथुनं वदन्ति ॥
कुलीरकर्काटककर्कटाख्यः कण्ठीरवः सिंहमृगेन्द्रलेयाः ।
पाथोनकन्यारमणीतरुण्यस्तौलीवणिक्जूकतुलाधटश्च ॥

(ब) मीनालिकर्कटमृगाः सलिलाभिधानास्तोयाश्रयाघटवधूयुगगोपसंज्ञाः ।
निस्तोयभूतलचराः क्रियचापतौलिकण्ठीरवाश्च बहवः प्रवदन्ति सन्तः ॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखतु । १०**

(अ) सूर्यादीनां त्रिकोणराश्यादिवर्णनम् ।

(ब) कालात्मत्वादिराजत्वादिनिरूपणम् ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितयोः कस्यचित् एकस्योपरि सान्वयं व्याख्यां करोतु । ०५**

(अ) षष्ठाष्टमे कर्किणि जन्मलग्नात् सौम्ये सुधारश्मिनिरीक्ष्यमाणे ।
अब्दैश्चतुर्भिः समुपैति नाशं जातो नरः सर्वबलान्वितोऽपि ॥

(ब) लग्नेन्त्यगौ भानुधराकुमारौ दिनेशचन्द्रेन्दुसुतामदस्याः ।
सुरालयोद्यानवनप्रदेशे प्रवासभूमौ म्रियते तु जातः ॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखतु । १०**

(अ) अथ लग्नायुसाधनम् ।

(ब) आयुर्दायाध्यायस्य सारांशः ।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितयोः कस्यचित् एकस्य उपरि सान्वयं व्याख्यां करोतु । ०५**

(अ) केन्द्रस्थे वा विलग्ने दिनकरतनये सौम्यखेटैरदृष्टे ।
भू सूनोः कालहोरासमयजमनुजो भिक्षुको दासभूतः ॥
सौम्यैर्दृष्टेऽर्क्किदृष्टे शशिनि सरुधिरे मेषगो भिक्षुकः स्या-
दर्कीन्द्वर्क्कैः सकेन्द्रैर्जडतनुरधनश्चान्यभुक्तासनः स्यात् ॥

(ब) रविशशियुते सिंहे लग्ने कुजार्किनिरीक्षिते
नयनरहितः सौम्यासौम्यैः सबुद्बुदलोचनः ।
व्ययगृहगतश्चन्द्रो वामं हिनस्त्यपरं रवि-
र्नशुभगदिता योगा याप्या भवन्ति शुभेक्षिताः ॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखतु । १०**

(अ) हंसयोगः हंसयोगफलम् ।

(ब) खड्गयोगः लक्ष्मीयोगश्च ।

**चतुर्थान्वितिः**

**प्रश्नः ७ अधोलिखितयोः कस्यचित् एकस्य सान्वयं व्याख्यां करोतु । ०५**

(अ) हृद्रोगी धनधान्यबुद्धिरहितः क्रूरः सुखस्थेरवौ ।
विद्याशीलसुखान्वितः परवधूलोलश्चतुर्थे विधौ ॥
भौमे बन्धुगते तु बन्धुरहितः स्त्रीनिर्जितः शौर्यवान् ।
बन्धुस्थेशशिजे विबन्धुरमलज्ञानीधनी पण्डितः ॥

(ब) दीर्घायुर्धनिको वसन्तसमये जातः सुगन्धप्रियो
ग्रीष्मर्तौ धनतोयसेव्यचतुरो भोगी कृशांगः सुधीः ।
क्षार क्षीर कटुप्रियः सुवचनो वर्षर्तुजः स्वच्छधीः ।
पुण्यात्मा सुमुखः सुखी यदि शरत्कालोद्भवः कामुकः ॥

**प्रश्नः ८ अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखतु । १०**

(अ) मान्द्यब्दादिफलाध्यायः ।

(ब) मासफलम् ।

**संयुक्तान्वितिः**

**प्रश्नः ९ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु । १०**

(१) जातकपारिजातग्रन्थस्य प्रथमाध्यायस्य नाम किम् ?

(२) सिंहराशेः निवासस्थानं कुत्राऽस्ति ?

(३) क्रिय इति शब्देन कः राशिः गृह्यते ?

(४) ताराग्रहाः के ?

(५) केतुग्रहस्य स्वरूपं किम् ?

(६) जलचरग्रहौ कौ ?

(७) राहुदोषं कः ग्रहः नश्यति ?

(८) राहुबुधद्वयोः दोषनाशं कः ग्रहः करोति ?

(९) सूर्यग्रहः अशुभं तदा कः रोगं करोति ?

(१०) पाकशब्दस्य अर्थः कः ?

(११) पूर्णायुः कतिवर्षतः कति वर्षपर्यन्तं भवति ?

(१२) परमायुः कतिवर्षतः कति वर्षपर्यन्तं भवति ?

(१३) बृहस्पतिशुक्रबुध एतेषु एकमपि बलिनः भूत्वा केन्द्रे भवति पापग्रहेणयुक्तश्चेत् फलं किम् ?

(१४) सिंहराश्यंशौचन्द्रः भवति तदानीं बालकस्योत्पत्तिर्जायते तदा आकृतिः फलं कीदृशं भवति ?

(१५) एकस्यां तिथौ करणसंख्या का ?

----००००----